# Nandikeshaproktam Shivarchanarahasyakathanam

# નન્દિકેશપ્રોક્તં શિવાર્ચનરહસ્યકથનમ્

## Document Information

Text title : Nandikeshaproktam Shivarchanarahasyakathanam

File name : shivArchanarahasyakathanaMnandikeshaproktam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 42| 21-55||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# નન્દિકેશપ્રોક્તં શિવાર્ચનરહસ્યકથનમ્

યે યે નરાઃ પરમશામ્ભવપાદપદ્મસેવારતાઃ કલિયુગેઽપિ વિશુદ્ધચિત્તાઃ ।
તે તાવદાદરવરાદિભિરન્વહં વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧॥

શ્રીનીલકણ્ઠ મદનાન્તક ચન્દ્રમૌલે શ્રીભાલલોચન યમાન્તક વિશ્વમૂર્તે ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૨॥

ઉત્પત્તિપાલનવિનાશનહેતુભૂત ભૂતેશ ભૂતનિવહાર્ચિતપાદપદ્મ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૩॥

કલ્યાણ પુણ્યગુણસાગર મેરુધીર રત્નસ્ફુરદ્ધરશરાસનકોટિહસ્ત ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૪॥

ગૌરીકુચોરુગિરિશેખરચારુહાર કાશ્મીરસારરસરઞ્જિતપાદપદ્મ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૫॥

આપાદુકપ્રણતદેવકિરીટકોટિરત્નપ્રભાપરિવૃતાઙ્ઘ્રિસરોજરાજ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૬॥

સંસારસાગર નિવારક કાલકાલ લીલાવિશેષપરિકલ્પિતકલ્પજાત ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૭॥

મન્નાથ સુન્દરતરાતિમનોહરાદ્રિકન્યાસનાથ વિધૃતોડુગણાધિનાથ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૮॥

રત્નાઙ્ગદાઙ્ગમણિકઙ્કણકિઙ્કિણીક ગૌરીમનોહર સુનૂપુરભાસુરાઙ્ઘ્રે ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૯॥

મન્દારકુન્દમકરન્દરસાભિષિક્તપાદારવિન્દ પરમાદરહારવીર ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧૦॥

કર્પૂરગૌર હર સુન્દરતારતાર તારામનોહરવિહાર વિહારહાર । (શૂરમનોહરવિહાર)
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧૧॥

મામીશ મામકધિયા પરિપાલયાશુ ક્લેશાપહારચતુર પ્રવરપ્રવીર ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧૨॥

સર્વામરેશ્વરમખર્વસુરારિગર્વનિર્વાપણપ્રવણ કારુણિકપ્રવીણ । (સર્વામરેશ્વરવરાતિસુરારિગર્વ)
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧૩॥

શ્રીમન્મહેશ કરુણાતરુણામ્બુરાશે ગૌરીમુખામ્બુજસહસ્રકરાઽઽદરેણ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧૪॥

મૃત્યુઞ્જયાવ્યય પિનાકકરામરારિવીરાન્ધકાસુરનિવારણકારણાશુ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧૫॥

શ્રીકાલકૂટવિષદોષવિદૂષકાશાપાશપ્રણાશનવિધાનવિનોદમોદ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧૬॥

સૌવર્ણવર્ણ સહિરણ્ય હિરણ્યબાહો શમ્ભો હિરણ્યદ હિરણ્યપતે સ્મરારે ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧૭॥

અન્યસ્તવાસ્તિ શિવ શઙ્કર પાલનીયો મત્તોઽધિકઃ કલુષનાશકરાતિધીર ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧૮॥

ઘોરાપરાધનિધિશોષક કામશત્રો ચિત્રત્રિનેત્ર કરુણારસપાત્રભૂત ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૧૯॥

ભસ્માવગુણ્ઠનવિનષ્ટમહાઘકોટિ રુદ્રાક્ષકર્ણપરવર્ણમવર્ણ્યવર્ણ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૨૦॥

શ્રીબિલ્વમૂલશિવલિઙ્ગસમર્ચનેન નિર્ધૂતપાતકકુલાચલમીશશીલમ્ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૨૧॥

દારાવિહારપરિહારરસાદરં માં ધીરં દુરોદરવિચારવિવર્જિતં ચ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૨૨॥

શમ્ભો ત્વદઙ્ઘ્રિકમલં કલયામિ કાલે કાલેઽનુવેલમતિવેલમતોઽનુવેલમ્ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૨૩॥

નિત્યં મહેશચરણસ્મરણપ્રવીણં પ્રક્ષીણપાપકરણં કરુણાર્ણવેશ ।
પાહીતિ યે સકૃદપિ પ્રવદન્તિ તે વઃ પૂજ્યા ભવન્તિ તદિદં પરમં રહસ્યમ્ ॥ ૨૪॥

યઃ કશ્ચિદન્તકરિપુસ્મરણપ્રવીણઃ પ્રાણપ્રયાણસમયેઽપિ સ એવ વન્દ્યઃ ।
પૂજ્યઃ સ એવ સકલાઘવિનાશહેતુઃ તત્પાદપદ્મભજનં નિધિરેવ કોઽપિ ॥ ૨૫॥

શ્રીકાલકાલ કરુણાકર દીનબન્ધો ભક્તપ્રભૂતકરુણારસસારસિન્ધો ।
માં દીનમપ્યનુદિનં પરિપાલયેતિ યે સંવદન્તિ સકૃદેવ હિ તે નમસ્યાઃ ॥ ૨૬॥

પ્રક્ષીણપાતકકુલં ભસિતત્રિપુણ્ડ્ર રુદ્રાક્ષભૂષણમદૂષણમન્ધકારે ।
પાહીતિ યે પ્રતિદિનં પ્રવદન્ત્યમન્દં તં વન્દનીયમસકૃત્ પ્રવદામિ દેવાઃ ॥ ૨૭॥

સ્વામિન્નશામ્ભવકથાર્ણવબાડબં માં શૈવાપકારતરુસારકુઠારભૂતમ્ ।
લિઙ્ગાર્ચનવ્રતવિદૂષકશૈલવજ્રં પાહીતિ યો વદતિ તં પ્રણમન્તિ દેવાઃ ॥ ૨૮॥

પાપામ્બુરાશિપરિહારકરપ્રવીરં હારં હરાર્ચનપરં ગતદુર્વિકારમ્ ।
ધીરાઃ પરં સતતમાદરતો નમન્તિ સન્તઃ કૃતાન્તપરિતાપનિવારણાય ॥ ૨૯॥

યે શૂલપાણિચરણસ્મરણપ્રવીણાઃ તે તાવદન્તકભયપ્રલયપ્રવૃત્તાઃ ।
પુણ્યાર્ણવાઃ પરમકારુણિકોત્તમાશ્ચ તત્પાદપદ્મભજને ક્વ ભયં ભવાબ્ધેઃ ॥ ૩૦॥

યે કાશિકાપુરપતે ત્રિપુરાન્તકારે વિશ્વેશ્વર ત્રિદશવન્ધપદારવિન્દ ।
માં રક્ષ રક્ષ વિષમેક્ષણ વીક્ષણેન પ્રક્ષીણપાપમિતિ વેદવિદો વદન્તિ ॥ ૩૧॥

સાનન્દમિન્દુશકલાભરણ પ્રણામશ્રેણીં ગૃહાણ કરુણોરુતરઙ્ગિણી તે ।
મય્યન્વહં પ્રસરતુ પ્રણતાર્તિનાશં સમ્પાદયત્વિતિ વદન્તિ ત એવ માન્યાઃ ॥ ૩૨॥

આનન્દકન્દ મદનદ્રુમવીતિહોત્ર પાહિ ત્રિનેત્ર સુચરિત્ર પવિત્રગાત્ર ।
શ્રીવિશ્વનાથ કરુણારસપાત્રમાત્રમિત્યુત્તમોત્તમતમાઃ પ્રવદન્તિ શૈવાઃ ॥ ૩૩॥

દુષ્ટાઘકોટિઘટિતાનપિ કાલકૂટકૂટોપમાનપિ મહેશ્વર પાહિ દીનાન્ ।
દીનાર્તિભઞ્જનમહાવ્રતદીક્ષિતાસ્માન્ પાહીતિ વેદવચનાનિ વદન્તિ માન્યાઃ ॥ ૩૪॥

લિઙ્ગાર્ચનવ્રતપરાત્ ન પરોઽસ્તિ કોઽપિ લોકે પ્રભૂતપરમાદ્ભુતપુણ્યરાશિઃ ।
લિઙ્ગાર્ચનવ્રતપરો ભવતીતિ વેદાઃ તાવદ્વદન્તિ બહવો બહુધા બુધાનામ્ ॥ ૩૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે નન્દિકેશપ્રોક્તં શિવાર્ચનરહસ્યકથનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૪૨। ૨૧-૫૫॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 42. 21-55..

Proofread by Ruma Dewan

*Nandikeshaproktam Shivarchanarahasyakathanam*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*